05-11-2020

संस्कृतसामान्यम्। उपशास्त्री II

अनिवार्यप्रथमपत्रम्।

प्र० → ङीष् प्रत्ययस्य प्रयोगः कस्मिन् स्थले भवति ?

उ० →

ङीष् स्त्रीप्रत्ययः अस्ति। स्त्रीत्वस्य विवक्षायां प्रातिपदिकेन सह अस्य प्रयोगः भवति।

'पुंयोगादाख्यायाम्' सूत्रानुसारेण यदि पुरुषवाचकः प्रातिपदिकः पुरुषसम्बन्धात् स्त्रीलिङ्गे प्रवृत्तः भवति ततो ङीष् स्यात्। यथा→ गोप+ङीष =गोपी

इन्द्रवरुणभवादिभिःशब्दैः सह आनुगागमः ङीष् च। यथा→ इन्द्र+आनुक् (आन्)+ङीष् (ई) = इन्द्राणी।

इकारान्त मनुष्यजातिवाचकेन प्रातिपदिकेन सहापि ङीष् स्यात् (इतो मनुष्यजातेः)।

यथा→ दक्ष+इञ् = दाक्षि

दाक्षि+ङीष् (ई) = दाक्षी।

षिद्भ्यो गौरादिभ्यश्च ङीष् स्यात् (षिद्गौरादिभ्यश्च)।

√नृत्+ष्वुन् > √नृत्+वु (अक्) = नर्तक्

नर्तक्+ङीष् (ई) = नर्तकी।

उदन्ताद् गुणवाचितो वा ङीष् स्यात् (वोतो गुणवचनात्)। यथा→ मृदु+ङीष् = मृद्वी।

बह्वादिभ्यश्च सूत्रोऽपि ङीष् प्रत्ययं करोति।

यथा→ बहु+ङीष् = बह्वी। रात्रिः।

05-11-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः)

रा० उ० सं० महावि० सुखसेना, पूर्णियाँ।

संस्कृत सामान्यम् । उपशास्त्री I

अनिवार्यप्रथमपत्रम् । संस्कृतानुवादः ।

[अस् धात्वाधारितानि सरलवाक्यानि विविधेषु लकारेषु :→

लट्

एकः बालकः अस्ति । द्वौ बालकौ स्तः । त्रयः बालकाः सन्ति ।
एका बालिका अस्ति । द्वे बालिके स्तः । तिस्रः बालिकाः सन्ति ।
एकं फलम् अस्ति । द्वे फले स्तः । त्रीणि फलानि सन्ति ।
त्वं बालकः असि । युवां बालकौ स्थः । यूयं बालकाः स्थ ।
अहमस्मि बालकः । आवां बालकौ स्वः । वयं बालकाः स्मः ।

लोट्

सः अस्तु । तौ स्ताम् । ते सन्तु ।
त्वम् एधि । युवां स्तम् । यूयं स्त ।
अहम् असानि । आवाम् असाव । वयम् असाम ।

लङ्

सः नृपः आसीत् । तौ आस्ताम् । ते आसन् ।
त्वम् आसीः । युवाम् आस्तम् । यूयम् आस्त ।
अहम् छात्रः आसम् । आवाम् आस्व । वयम् आस्म ।

विधिलिङ्गम् - सा बालिका स्यात् । ते बालिके स्याताम् । ताः स्युः ।
त्वं स्याः । युवां स्यातम् । यूयं स्यात ।
अहं स्याम् । आवां स्याव । वयं स्याम ।

लृट्

सः शिक्षकः भविष्यति । तौ भविष्यतः । ते भविष्यन्ति ।
त्वं भविष्यसि । युवां भविष्यथः । यूयं भविष्यथ ।
अहं भविष्यामि । आवां भविष्यावः । वयं भविष्यामः ।

05-11-2020

डॉ० निर्मल कुमार झा, (स० प्राचार्य,)
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ

05-11-2020

शास्त्री

साहित्यम् ।

प्र० → छन्दालङ्कारनिर्णयं कुरुत ।

" इयं हि निद्रा नयनावलम्बिनी
ललाटदेशादुपसर्पतीव माम् ।
अदृश्यरूपा चपला जरेव या
मनुष्यसत्त्वं परिभूय वर्धते ॥ "
श्रीशूद्रक/ मृच्छकटिकम्- 3-8

उ० → प्रस्तुतस्य पद्यस्य प्रत्येके चरणे द्वादशाक्षराः सन्ति ।

यगणादि निर्णयः →

इयं हि निद्रा नयनावलम्बिनी, ललाटदेशादुपसर्पतीव माम् ।

। S । S S । । S । S । S । S । S S । । S । S । S

जगण तगण जगण रगण, जगण तगण जगण रगण

जगणादिनिर्णयं ज्ञायते यदत्र जगत्याः छन्दस्य भेदः वंशस्थवृतम् अस्ति । तल्लक्षणम् →

" जतौ तु वंशस्थमुदीरितं जरौ । "

अलङ्कारः → उत्प्रेक्षा । " सम्भावनमथोत्प्रेक्षा । "
उत्प्रेक्षां (कल्पनां) करोति कविः → उपसर्पतीव इव ।
क्रियापदेन सह योगः ।

उपमा अपि → उपमानम् → जरा
उपमेयः → निद्रा
उपमावाचीपदम् → इव

अस्मिन् पद्ये उत्प्रेक्षोपमयोः सत्ता स्वतंत्ररूपेण वर्तते ।
अतएवात्र संसृष्टिः अलङ्कारः ।

05-11-2020

डॉ० निर्मल कुमार झा (स० प्राचार्यः
रा० उ० सं० महावि० सुखसेना, पूर्णियाँ